# जैनप्रमाणमीमांसायां प्रत्यक्षप्रमाणविमर्शः

शशांकशेखरपात्रः

सारसंक्षेपः "प्रमेयसिद्धिः प्रमाणाद्धि" इति नियमात्प्रमाणतत्त्वस्य प्रमेयस्य प्रामाण्ये महत्वं वर्तते। भारतीयदर्शनेषु प्रमाणतत्त्वमीमांसा परमोच्चस्थानं लभ्यते नास्ति विषयेऽस्मिन् कस्यापि संशयः। किं नाम प्रमाणमित्याकाङ्क्षायामुच्यते प्रमायाः करणमेव प्रमाणम्। लोकिके सर्वं वस्तु प्रमेयं ज्ञानविषयकत्वाद्भवति। ज्ञानमेव प्रमा, तस्याः करणमेव प्रमाणम्। यद्यपि सर्वैः दार्शनिकैः प्रमाकरणं प्रमाणमिति मतं स्वीक्रियते तथापि प्रमाकरणविषये तेषु वैमत्यं परिलक्ष्यते। एवं प्रमाणमीमांसायां यावत्परमतं न निराक्रियते तावत्स्वमतं न प्रतिष्ठितमिति न्यायाद्दार्शनिकेषु चतस्रः विप्रतिपत्तयः लक्षणविप्रतिपत्तिः, संख्याविप्रतिपत्तिः, विषयविप्रतिपत्तिः, फलविप्रतिपत्तिश्च परिलक्ष्यते। जैनदर्शने दार्शनिकैः सम्यग्ज्ञानमेव प्रमाणमित्युच्यते। ज्ञानस्य कथं प्रमाणत्वं संगच्छते इत्याकाङ्क्षायामुच्यते यथा दीपः स्वयं प्रकाशको भवति, तस्य प्रकाशे दीपान्तरस्य प्रयोजनं न वर्तते। अपि च तस्य प्रभया वस्तूनां प्रकाशो भवति। इत्थं ज्ञानं स्वप्रकाशात्प्रमा, तेन परप्रकाशात्प्रमाणं भवति। ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्यायकेवलभेदेन। एतानि ज्ञानानि द्वाभ्यां प्रमाणाभ्यां विभज्यते। ते प्रमाणे परोक्षप्रत्यक्षे भवतः। एतेषु ज्ञानेषु परोक्षप्रमाणं खलु मतिश्रुते। प्रत्यक्षप्रमाणं खलु त्रिविधं अवधिमनःपर्यायकेवलभदेन। परन्तु गच्छता कालेन स्वपक्षस्थापनया सह परपक्षनिराकरणस्यापि आवश्यकता अनुभूता आचार्यैः। अतः परवर्तिनिकाले मतिज्ञानस्य प्रत्यक्षप्रमाणेऽन्तर्भावत्वमुच्यते। वस्तुनः स्पष्टं ज्ञानमेव प्रत्यक्षप्रमाणम्। प्रमाणमिदं प्रमाणान्तरसापेक्षं न भवति। प्रत्यक्षप्रमाणं द्विविधं सांव्यवहारिकं पारमार्थिकञ्चेति। सांव्यवहारिकं द्विविधम् इन्द्रिजम् अनिन्द्रियजञ्चेति। पारमार्थिकप्रत्यक्षं द्विविधं सकलं विकलञ्चेति। सकलं प्रत्यक्षं खलु केवलज्ञानम्। विकलं प्रत्यक्षं अवधिज्ञानं मनःपर्याय परोक्षं पञ्चधा स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदेन। केचन मन्यते प्रत्यक्षं द्विधा मुख्यसांव्यवहारिकभेदेन। मुख्यं द्विधा सकलविकलभेदेन। केवलज्ञानं खलु

सकलप्रत्यक्षम्। अवधिमनःपर्यायकेवलानि विकलप्रत्यक्षानि। सांव्यवहारिकं द्विधा इन्द्रियजानिन्द्रियजभेदेन। इन्द्रियजं चक्षुरादिजनितम्। अनिन्द्रियजं मनोजन्म। मतिज्ञानं खलु सांव्यवहारिकं प्रत्यक्षम्। मतिज्ञानं चतुर्विधं अवग्रहेहावायधारणाभेदेन। इत्थं 'जैनप्रमाणमीमांसायां प्रत्यक्षप्रमाणविमर्शः' इति शीर्षके जैनसम्मतं प्रत्यक्षप्रमाणं सविशदं स्पष्टीक्रियते।

मूलशब्दाः ज्ञानम्, प्रमाणम्, प्रत्यक्षम्, मतिः, अवधिः, मनःपर्यायः, केवलमित्यादयः

उपोद्घातः भारतीयदर्शनस्य मूलं प्रयोजनं खलु परमपुरुषार्थप्राप्तिः। सामान्यतया पुरुषार्थश्चत्वारः धर्मार्थकाममोक्षभेदेन भवन्ति। पुरुषार्थचतुष्टये परमपुरुषार्थः खलु मोक्षः। परमपुरुषार्थमोक्षप्राप्तषूपायेषु बहुधा विप्रतिपत्तयः सन्ति दार्शनिकसम्प्रदायेषु। यावत्परमतं न निराक्रियते तावत्स्वमतं न प्रतिष्ठितमिति धिया जैनदार्शनिकेन सम्यग्दर्शनज्ञानचारित्रैः मोक्षः लभ्यते इत्युच्यते। तदुच्यते "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः"।[1] सम्यज्ज्ञानं मतिश्रुतावधिमनः - पर्यायकेवलभेदेन पञ्चविधं भवन्ति। तदुच्यते "मतिश्रुताऽवधिमनःपर्यायकेवलानि ज्ञानम्।[2]" ज्ञानमिदं जैननये प्रमाणरूपेण स्वीकृतम्। तदुच्यते "तत्प्रमाणे।[3]" प्रमाणं द्विविधं प्रत्यक्षं परोक्षञ्चेति। तदुच्युते "आद्ये परोक्षम्। प्रत्यक्षमन्यत्।[4]" जैनमते तत्त्वार्थसूत्रानुसारमिन्द्रियमनसोः साहाय्यं विना केवलमात्मना जन्यं ज्ञानं प्रत्यक्षप्रमाणम्। इन्द्रियजन्यं ज्ञानं परोक्षमित्युच्यते। परन्तु लोके इन्द्रियव्यापारजन्यं ज्ञानं प्रत्यक्षत्वेन ज्ञायते। इन्द्रियव्यापाररहितं ज्ञानं परोक्षमित्युच्यते। फलतः लोकजीवनव्याहताज्जैनदार्शनिकैः प्रत्यक्षलक्षणमुच्यते इन्द्रियमनोभ्यां जन्यं ज्ञानं प्रत्यक्षमिति। जैननये पञ्चविधेषु ज्ञानेषु मतिज्ञानं श्रुतज्ञानञ्च मनरिन्द्रियाभ्यां जन्यं भवति। अतः एते परोक्षज्ञानमुच्यते। अपि चावधिमनःपर्यायकेवलज्ञानानि आत्मजन्यानि भवन्ति। अत एतानि प्रत्यक्षज्ञानान्युच्यन्ते।

प्रत्यक्षलक्षणम् तत्त्वार्थवार्त्तिकमिति ग्रन्थे आगममूलकं प्रत्यक्षलक्षणं निरूप्यते। इन्द्रियाजन्यमनिन्द्रियाजन्यञ्च व्यभिचाररहितं साकारज्ञानमेव

प्रत्यक्षमिति प्रत्यक्षलक्षणं स्वीकृतम्। तत्र 'इन्द्रियानिन्द्रियानपेक्षमतीतव्यभिचारं साकारग्रहणं प्रत्यक्षम्।[5]" लक्षणघटकस्य 'इन्द्रियानिन्द्रियानपेक्षमि'ति विशेषणपदेन मतिश्रुतयोः परोक्षज्ञानयोः लक्षणस्यास्यातिव्याप्तिर्निराक्रियते। 'अतीतव्यभिचारमि'ति विशेषणपदेन विभङ्गज्ञाने लक्षणस्यास्यातिव्याप्तिर्निराक्रियते। विभङ्गज्ञानं खलु व्यभिचारिज्ञानम्। यद्यप्यवधिज्ञानमात्मसापेक्षजन्यं ज्ञानं तथापि मिथ्यादर्शनोदयाद्व्यभिचारि भवति। अनेन पदेन विभङ्गज्ञाने लक्षणस्यास्यातिव्याप्तिर्निराक्रियते। जैनदर्शने नामजात्यादियोजनारहितं निराकारञ्च निर्विकल्पकज्ञानं दर्शनमित्युच्यते। तस्मिन् ज्ञाने 'साकारग्रहणमि'ति पदेन लक्षणस्यास्यातिव्याप्तिर्निराक्रियते। अपि च तेन स्पष्टमुक्तं केवलमात्मजन्यं ज्ञानं प्रत्यक्षं भवतीति। तदुच्यते "अक्षं प्रति नियतमिति परापेक्षानिवृत्तिः।[6]"

ननु प्रश्न उदेति जैनेतरदर्शने इन्द्रियव्यापारजन्यं ज्ञानं प्रत्यक्षम्, इन्द्रियव्यापाररहितं ज्ञानं परोक्षमित्युच्यते। परन्तु जैनदर्शने मतमिदं कथं न गृहीतमित्याकाङ्क्षायामुच्यते पूज्यपादाचार्येणोक्तं यज्जैनदर्शने सर्वज्ञ आप्तपुरुषो वा प्रत्यक्षज्ञानेन सर्वान् पदार्थान् ज्ञातुं शक्नोति। यदीन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति स्वीक्रियते तर्हि सर्वज्ञः सर्वान् पदार्थान् प्रत्यक्षपूर्वकं ज्ञातुं न शक्नोति। एतर्हि अखिलपदार्थानां ज्ञानानामभावे पुरुषस्य सर्वज्ञत्वं न प्रतिपन्नं भवितुमर्हति। तदुच्यते "'इन्द्रियनिमित्तं ज्ञानं प्रत्यक्षम्, तद्विपरीतं परोक्षम्' इत्यविसंवादिलक्षणमिति चेत्; न; आप्तस्य प्रत्यक्षाभावप्रसङ्गात्।[7]" परन्तु जैनागमे आप्तपुरुषः सर्वज्ञो भवति। यतो हि स सर्वान् पदार्थान् प्रतिक्षणं प्रत्यक्षं कर्तुं शक्नोति। अत आत्मजन्यमिन्द्रियनिरपेक्षञ्च ज्ञानं प्रत्यक्षं स्वीक्रियते। एतेन सर्वज्ञस्याखिलपदार्थानां प्रत्यक्षेण ज्ञातृत्वमपि सिद्धं भवति। अपि चानेनाप्तपुरुषस्य सर्वज्ञत्वमपि सिध्यति। तदुच्यते "तदयुक्तम्, आप्तस्य प्रत्यक्षज्ञानाभावप्रसङ्गात्। यदि इन्द्रियनिमित्तमेव ज्ञानं प्रत्यक्षमिष्यते एवं सति आप्तस्य प्रत्यक्षज्ञानं न स्यात्।[8]"

ननु इन्द्रियं विना केवलमात्मना बाह्यवस्तूनां प्रत्यक्षं कथं सम्भवेदित्याकाङ्क्षायामकलङ्कदेवेनोक्तं यद्रथस्य निर्माता यथा तपसा प्राप्तेन ऋद्धिविशेषेण बाह्योपकरणादिकं विना अपि रथं निर्मातुं शक्नोति तद्वदात्मा अपि सर्वेषां ज्ञानावरणकर्मणां क्षये सति इन्द्रियादिकं बाह्यसाधनं विनापि बाह्यार्थं ज्ञातुं शक्नोति।

तदुच्यते "यथा रथस्य कर्ता अनीशः उपकरणापेक्षो रथं करोति, स तदभावे न शक्तः, यः पुनरीशः तपोविशेषात् परिप्राप्तर्द्धिविशेषः स बाह्योपकरणगुणानपेक्षः स्वशक्त्यैव रथं निवर्तयन् प्रतीतः, तथा कर्ममलीमस आत्मा क्षायोपशमिकेन्द्रियानिन्द्रिय-प्रकाशाद्युपकरणापेक्षोऽर्थान् संवेत्ति, स एव पुनः क्षयोपशमविशेषे क्षये च सति करणानपेक्षः स्वशक्त्यैवार्थान् वेत्ति इति को विरोधः?"[9] वस्तुतो जैनागमधारायामेतत्स्पष्टं भवति यत्प्रत्यक्षप्रमाणमात्माश्रितं भवति। आत्मा सर्वेषां ज्ञानावरणकर्मणां क्षये सति इन्द्रियाणां साहाय्यं विना बाह्यार्थं प्रत्यक्षेण जानाति। परन्तु न्यायादिषु दर्शनेषु प्रमाणचर्चायामिन्द्रियजन्यं ज्ञानं प्रत्यक्षमित्यनुसारेण तैरपि इन्द्रियजन्यं ज्ञानं प्रत्यक्षं स्वीक्रियते।

लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति नियमात्प्रत्यक्षस्य लक्षणमुक्तं यज्ज्ञानं स्पष्टं साकारञ्च द्रव्यपर्यायात्मकसामान्यविशेषात्मकस्य विषयस्य प्रकाशकम्, स्वप्रकाशकमात्मवेदनं वा तज्ज्ञानं प्रत्यक्षप्रमाणम्।[10] लक्षणघटके साकारमिति विशेषणपदेन स्पष्टं भवति यज्जैनागमे वस्तुनः आकारनामादिसहितं सविकल्पकप्रत्यक्षं स्वीक्रियते, न तु निराकारनामादिरहितं निर्विकल्पकप्रत्यक्षम्। अतो लक्षणे साकारमिति विशेषणं सार्थकं भवति। उल्लेखनीयं यज्जैनागमे ज्ञानं सामान्यतया साकारं भवति चेत्तर्हि प्रत्यक्षप्रमाणमिव परोक्षप्रमाणमपि साकारं भवति। एतर्हि परोक्षप्रमाणात्प्रत्यक्षप्रमाणस्य व्यावृत्त्यर्थं परवर्तिनि समये जैनदार्शनिकैः प्रत्यक्षलक्षणे विशेषणपदस्य प्रयोजनं निराकृतम्। स्पष्टं खलु वैशद्यमिति। अर्थात् प्रत्यक्षप्रमाणमनुमानादीतरेभ्यः प्रमाणेभ्यः समधिकप्रकाशकं भवति। यथा दूरादेकस्य वृक्षस्य वृक्षावयवानां सामान्यज्ञानम्। ज्ञानेनानेन वृक्षस्यान्तिके विशेषभावेन पत्रपुष्पकाण्डादिभिः वृक्षोऽयमिति ज्ञानं भवति। वृक्षस्य एवमाकारविशिष्टज्ञानं सदैव अव्यभिचारि भवति। इत्थं वृक्षस्य सामान्यज्ञानं ज्ञात्वा तदुत्तरकालेऽनुमानप्रमाणेनापि वृक्षस्य दूराद्विशेषज्ञानं भवितुमर्हति। परन्तु ज्ञानमिदं लिङ्गज्ञानेन व्यवधानात्प्रत्यक्षं न भवति। ननु वृक्षस्यान्तिके कस्यचित्तु अतिस्पष्टं ज्ञानं भवति, कस्यचिच्च वृक्षस्य स्पष्टज्ञानं भवति। ज्ञानस्य वैशद्यस्य स्पष्टत्वस्य तारतम्यमिदं विशदज्ञानावरणात्कर्मणः भवति।

प्रत्यक्षविभागः

प्रत्यक्षप्रमाणं द्विविधं मुख्यप्रत्यक्षं संव्यवहारप्रत्यक्षञ्चेति।[11] वादिदेवसूरिमहोदयेन मुख्यप्रत्यक्षस्य नामान्तरं खलु पारमार्थिकं कथितम्।[12] सांव्यवहारिकप्रत्यक्षं द्विविधम् इन्द्रियप्रत्यक्षमनिन्द्रियप्रत्यक्षञ्चेति। सांव्यवहारिकं प्रत्यक्षमेव मतिज्ञानं भवति। पारमार्थिकप्रत्यक्षं विकलसकलभेदेन द्विविधं भवति। विकलप्रत्यक्षं द्विविधमवधिज्ञानं मनःपर्यायश्चेति। सकलप्रत्यक्षं खलु केवलज्ञानम्। मुख्यप्रत्यक्षम् ज्ञानावरणकर्मणां क्षये सति आत्मना जन्यं ज्ञानं मुख्यप्रत्यक्षम्। ज्ञानोत्पत्त्यामस्यां इन्द्रियमनसोः प्रयोजनं नास्ति। इन्द्रियसापेक्षरहितत्वाज्ज्ञान-मिदमतीन्द्रियज्ञानं पारमार्थिकप्रत्यक्षमप्युच्यते।

मुख्यप्रत्यक्षविभागः

मुख्यप्रत्यक्षं त्रिविधं भवति अवधिमनःपर्यायकेवलभेदेन। एतेषु सकलप्रत्यक्षं खलु केवलज्ञानम्, अवधिमनःपर्यायज्ञाने खलु विकलप्रत्यक्षम्।

अवधिज्ञानम्

'अव समन्ताद् द्रव्यादिभिः परिमितत्वेन धीयते ध्रियते विषयः अनेनेत्यवधिः।' अवधिज्ञानं इन्द्रियमनसोः साहाय्यं विना केवलमात्मसन्निधानेन सर्वेषां ज्ञानावरणां क्षये सति आत्मनि जायते। अनेन ज्ञानेन रूपवतः द्रव्यस्य भिन्नानां पर्यायाणां ज्ञानं भवति।[13] अवधिज्ञानं द्विविधं भवति। यथा भवप्रत्ययः गुणप्रत्ययश्च।

मनःपर्यायज्ञानम्

मनसः संयमेन ज्ञानावरणानां कर्माणां क्षये सति मनःपर्यायज्ञानं भवति। तदुच्यते "संयमविशुद्धिनिबन्दनाद्विशिष्टावरणविच्छेदाज्जातं मनोद्रव्यपर्यायालम्बनं मनःपर्यायज्ञानम्।"[14] ज्ञानमिदमात्मसापेक्षमिन्द्रियनिरपेक्षं भवति। ज्ञानस्यास्य विषये जैनदार्शनिकानां द्विविधं मतं प्राप्यते। प्रथममतानुसारं मनःपर्यायज्ञानेनान्यस्य मनसि चिन्तनीयविषयो ज्ञायते। द्वितीयमतानुसारं मनःपर्यायज्ञानेनान्यस्य मनसः पर्यायाः ज्ञायते तथा चिन्तनीयविषयस्य ज्ञानमनुमानप्रमाणेन भवति।

मनःपर्यायज्ञानं द्विविधम् ऋजुमतिः विपुलमतिश्चेति भवति।

केवलज्ञानम्

केवलज्ञानमेव सकलप्रत्यक्षं भवति। अवधिमनःपर्यायकेवलज्ञानेषु केवलज्ञानं विशुद्धतमं भवति। मोहस्य ज्ञानावरणस्य दर्शनावरणस्य च प्रतिबन्धककर्मणः निःशेषेण क्षयादनन्तरं ज्ञानमिदमुत्पद्यते। तदुच्यते "मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम्।"[15] केवलज्ञानेन सूक्ष्मान्तरितदूरस्थितानां पदार्थानां प्रत्यक्षं भवति।

सांव्यवहारिकप्रत्यक्षम्

इन्द्रियमनोभ्यां जन्यं ज्ञानं सांव्यवहारिकमित्युच्यते। ज्ञानमिदं सर्वेषां ज्ञानावरणानां क्षयोपशमे सति आत्मनि जायते, परन्तु इन्द्रियजन्यत्वाज्ज्ञानमिदं सांव्यवहारिकमप्युच्यते। यदा इन्द्रियनिमित्ताज्ज्ञानमिदं जायते तदा ज्ञानमिदमिन्द्रियप्रत्यक्षमित्युच्यते। पुनश्च यदा मनोनिमित्ताज्ज्ञानमिदं जायते तदा ज्ञानमिदमनिन्द्रियप्रत्यक्षमित्युच्यते। इत्थं सांव्यवहारिकप्रत्यक्षं द्विविधमिन्द्रियप्रत्यक्षमनिन्द्रियप्रत्यक्षञ्च।

इन्द्रियप्रत्यक्षम्

इन्द्रियजन्यं प्रत्यक्षमेव इन्द्रियप्रत्यक्षम्। तदुच्यते "आत्मावधानेनाव्यग्रमनसा सहकृतात् निर्दुष्टेन्द्रियत्वात् जातमिन्द्रियप्रत्यक्षम्।"[16] इन्द्रियं पञ्चविधं भवन्ति। तानि च श्रोत्रचक्षुघ्राणरसनास्पर्शेन्द्रियाणि। तदुच्यते "इन्द्रियञ्च स्पर्शनरसनघ्राणचक्षुःश्रोत्रेन्द्रियमिति पञ्चविधम्।"[17] चक्षुरादीनां विषयाः स्पर्शरसगन्धरूपशब्दाः भवन्ति। जैननये मनः अन्तरिन्द्रियं भवति। जैननये पञ्चविधेषु इन्द्रियेषु चत्वारि श्रोत्रघ्राणरसनास्पर्शेन्द्रियाणि पदार्थेन सह संयुज्य पदार्थस्य ज्ञानं प्रकाशयति। अत एतानि इन्द्रियाणि प्राप्यकारिणि भवन्ति। परन्तु चक्षुरिन्द्रियं मनश्च पदार्थेन सह संयोगं विना पदार्थं प्रापयति। अपि चापरोक्षपदार्थान् प्रापयति। अत एतदप्राप्यकारि भवति। प्रत्येकमिन्द्रियं द्विविधं द्रव्येन्द्रियं

भावेन्द्रियञ्चेति।

अनिन्द्रियप्रत्यक्षम्

जैनदर्शनेऽनिन्द्रियमिति शब्देन मनो बोध्यम्। तदुच्यते "सर्वार्थग्रहणं मनः अनिन्द्रियम् इति नोइन्द्रियमिति चोच्यते।"[18] अपि चानेन मनसः इन्द्रियनिरपेक्षत्वं बोध्यम्। तदुच्यते "तस्येन्द्रिनिरपेक्षस्य तज्जनकत्वाभावात्।"[19] आत्मा इन्द्रियं विना मनसा सह संयुज्यते तदा बाह्यार्थस्य ज्ञानं भवति। इन्द्रियेण स्वस्वविषयस्य ज्ञानं भवति, परन्तु मनसा सर्वेषां विषयाणां ज्ञानं भवति। इन्द्रियमिव मनः अपि पुद्गलिकं भवति। अत आत्मना सह संयोगेन मनः बाह्यार्थस्य ग्रहणे समर्थं भवति।

उपसंहृतिः

भारतीयदर्शनेषु प्रमाणमीमांसायां यद्यपि न्यायदर्शनमिव जैनदर्शनस्य महत्वं न गृह्यते तथापि जैनदर्शनस्य मतं नोपेक्षणीयमिति। जैनदर्शनमागममूलकदर्शनम्। अतः आगमिकधारायां जैनमतं यादृशं प्रसृतम्, जैनप्रमाणयुगीयधारायां ततोऽधिकं प्रसृतमिति। वस्तुतः आगमिकधारायां यत्प्रत्यक्षलक्षणमुच्यते जैनप्रमाणयुगीयधारायां तस्य परिवर्तनं परिलक्ष्यते। यतो हि आगमयुगस्य दर्शनस्य मूललक्ष्यं मोक्षप्राप्तिः। मोक्षलाभे आत्मज्ञानहेतुः भवति। अत आत्मज्ञानमेव प्रत्यक्षमुच्यते। परन्तु लोकजीवने संसारजीवनव्याहतादिन्द्रियजन्यं ज्ञानं प्रत्यक्षमुच्यते। इत्थं प्रत्यक्षं द्विविधं सांव्यवहारिकं पारमार्थिकञ्च उच्यते। इत्थं निवन्धेऽस्मिन् जैनदर्शनदिशा प्रत्यक्षप्रमाणमालोच्यते इति शम्।

सन्दर्भाः-


1. त.सू.१.१
2. त.सू.१.९
3. त.सू१.१०
4. त.सू.१.११-१२
5. त.वा.१.१२
6. त.वा.१.१२
7. त.वा १.१२
8. स.सि.१.१२

9. त.वा.१.१२
10. ल.त्र.का.३
11. ल.त्र.का.४
12. न्या.वि.वि.२.४
13. न्या.वि.वि. २.२९
14. न्या.वि.वि.२.२२
15. त.सू.१०.१
16. प्र.प्र.१.४
17. प्र.प्र.१.३
18. प्र.मी.१.१.२
19. प्र.मी.१.१.२

## सहायकग्रन्थाः


१. अकलङ्कदेवः, सम्पा. जैन महेन्द्रकुमारः, (१९४४), 'तत्त्वार्थवार्तिकम्', भारतीय ज्ञानपीठप्रकाशनम्।

२. अकलङ्कदेवः, सम्पा. जिनविजयमुनिः, (१९३६), अकलङ्कग्रन्थत्रयम्, (लघीयस्त्रयम्, न्यायविनिश्चयः, प्रमाणसंग्रहश्च), सिंघीजैनग्रन्थमाला।

३. हेमचन्द्रः, सम्पा. सुखलालजी संघवी, (१९३९), 'प्रमाणमीमांसा (स्वोपज्ञवृत्तिसहिता)', सिंघीजैनग्रन्थमाला।

४. पूज्यपादः, सम्पा. शास्त्री फूलचन्द्रः, (१९९७), 'सर्वार्थसिद्धिः', भारतीयज्ञानपीठप्रकाशनम्।

५. उमास्वामिः, सम्पा. शास्त्री ए. शान्तिराजा, (१९४४), तत्त्वार्थसूत्रम् (तत्त्वार्थवृत्तिसहितम्), ओरियेण्टाल लाइब्रेरि।

६. वादिराजसूरिः, सम्पा. जैन महेन्द्रकुमारः, (२०००), 'न्यायविनिश्चयविवरणम्', भारतीयज्ञानपीठ।

७. भावसेनः, सम्पा. विद्याधरः, (१९६६), प्रमाप्रमेय, जैनसंस्कृतिसंरक्षकसंङ्घः।


❋ ❋ ❋